Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 5 | ISSN : 2581- 6306

# वासवदत्तायां नारीत्वम्

Sraboni Tudu
Assistant Professor, Department of Sanskrit, Durgapur Women's College, West Bengal

**Article Info**
Volume 5, Issue 5
Page Number : 65-70

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 10 Sep 2022

**सारांशः -** समाजे नारीणां स्थानं देवीतुल्या आसीत्। यतो हि नारीणां गौरवचर्चा रामायणादौ सर्वत्र कृता अस्ति। वैदिकवाङ्मयानुशीलनेन ज्ञायते यत् पुराकालादेव नारीणां स्थानमभ्यर्हितमतीव गौरवास्पदमासीत्। ऋषिका, गृहिणी, गृहस्वामिनी, माता, भगिनी, पुत्री इत्यादिभिः विशेषणपदैः समलंक्रियते स्म। सा सर्वक्षेत्रेषु कुशला भवति स्म। यथा रामायणे कविना सीतायाः सखीनाञ्च चरित्रविवरणैः तत्कालीननारीजीवनं वर्णितम्।

**ससखीसीतासङ्गीतेक्षणसुखितशिर सञ्चाली।**
**विश्वनाथनिनदेन निन्द्यते समदमदननिनदाली।।**

सखीभिः सीतायाः सङ्गीतस्य ईक्षणेन सुखितः स चाऽसौ स च, ससखीत्यादिना तादृशजानकीकर्तृत्वमुक्तम्, शिरःसञ्चालीत्यनेन भावसूचने जानकीज्ञापितरहस्य–विज्ञातृत्वमवगम्यते। अत्र समदमनेति पदेन सदा सरलस्वभावा ससखीका जानकी इति ज्ञायते।

अतः मया स्वप्नवासवादत्ते कथं नारीरूपेण वासवादत्ता चित्रिता इति विषयं मनसि निधाय लेखोऽयं विचारित।

**विशेषशब्दाः**– स्त्री, स्त्रीणां प्रधानधर्मः, आत्मा , वासवदत्ता, गुणग्राहिणी, निष्कपटपूर्णा नायिका , प्रत्युत्पन्नमतिः, दयालुता इत्यादयः।

प्रपञ्चे स्त्रीपुरुषयोः समानत्वं प्रतिपादयति साक्षाद्भगवान् मनुरेव। ब्रह्मणो देहस्य अर्धेनार्धेन पुरुषः स्त्री च असृज्येतामिति ततः स्त्रिय एव विराट्पुरुष उत्पन्न इति तत एव पुनः धर्मप्रवर्तको मनुः आविर्भूदिति च मनुः महर्षीनुपादिशत्।

**द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।**
**अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः।।**
**तपस्तप्त्वाऽसृजद्यं तु स्वयं पुरुषो विराट्।**
**तं मां वित्तास्य सर्वस्य स्त्रष्टारं द्विजसत्तमाः।।**[1]

एतेन सिद्धं यत् स्त्री विराट्पुरुषस्य मनोरपि च जननी वन्द्या चेति। **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः** इत्यादीनि वाक्यानि स्त्रियः पूज्यत्वमुपदिशन्ति। सन्तानप्राप्त्यर्थं सन्तानपोषणार्थं, अहन्यहनि लोकयात्रार्थं च पत्नी पुनश्च आवश्यकी।

---

[1].म.स्मृ.1.32–33

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**उत्पादनमपत्यस्य जातस्य परिपालनम्।**

**प्रत्यहं लोकयात्राया: प्रत्यक्षं स्त्रीनिबन्धनम्।।**[2]

कावेयं लोकयात्रेति – गृहधनरक्षणं, तद्व्ययं, शौचं, अन्नपचनं, गृहोपकरणानां रक्षणम् इत्यादीनि लोकयात्रेति भावयाम:। तथाहि –

**अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।**

**शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे।।**[3]

पुनश्च सन्तत्यै, धर्माचरणाय, आत्मन: पितृणामपि उत्तमलोकप्राप्त्यर्थं च पत्नी एव गतिरिति मनुरेव स्पष्टमुक्तवान्।

**अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा।**

**दाराधीनस्तथा स्वर्ग: पितृणामात्मनस्तथा।।**[4]

स्त्रीणां श्रियां च मध्ये न कोऽपि भेद:। स्त्री लक्ष्मीस्वरूपिणीति मनोर्वचनम्।

**स्त्रिय: श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन।**[5]

तस्मादेव तस्या: पूजनं देवतापूजनमिति तदगौरव: देवतावमान: इव। तस्मात् कार्यवैफल्यं सम्भवेदिति उक्तम्।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया:।।**[6]

तस्मात् – दम्पती परस्परस्नेहेन प्रवर्तेयातामिति, तादृशदम्पती यस्मिन् कुले विलसत: तस्मिन् कुले सकलकल्याणपरम्परा सम्भवतीति च मनुरवोचत्।

**सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।**

**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।**[7]

पुनश्चैतादृशी स्त्री सर्वदा पुरुषाणां निरपेक्षया पोष्या। यथा सा आत्मपोषणार्थं रक्षणार्थं वा प्रयत्नरूपमपि श्रमं न प्राप्येत तथा स गृहजनै: पूज्या संरक्ष्या च।

**बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने।**

**पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम्।।**[8]

अस्मिन् खण्डे प्रधानतया मनुष्यस्त्रीणां वृत्तान्त: एव चर्चित:। वानरस्त्रीणां राक्षसस्त्रीणां च वृत्तं क्रमश: वानरवृत्ते असुरवृत्ते च चर्चितम्। शबर्यादितपस्विनीनां वृत्तं मुनिवृत्ते चर्चितम्।

---

2.म.स्मृ.9.27

3.म. स्मृ.9.11

4.म.स्मृ. 9.28

5.म.स्मृ.9.26

6.म.स्मृ.3.56

7.म.स्मृ.3.60

8.म.स्मृ–5.17

- **स्त्रीणां प्रधानधर्मा:-** कस्याश्चन स्त्रिया: सतीत्वं (पातिव्रत्यम्) प्रधानधर्मतया उद्दिष्टम्। यत्र कुत्र वा पतिर्निवसेत् स दुष्टो वा यदि वा पुण्यात्मा धनहीनो वा वैभवसम्पन्न: स एव स्त्रीणां सदा सेव्य: इति तेन पतिना विना स्त्रिय: अपरो बान्धवो नास्तीति च साध्वी अनसूया कदाचित् प्रसङ्गवशात् सीतामुक्तवती।

**नगरस्थो वनस्थो वा पापो वा यदि वा शुभ:।**

**यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदया:॥**

**दुश्शील: कामवृत्तो वा धनैर्वा परिवर्जित:।**

**स्त्रीणामार्यस्वभावानां परमं दैवतं गति:॥**

**नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम्।**

**सर्वत्र योग्यं वैदेहि तप: कृतमिवाव्ययम्॥**[9]

पुन: **आत्मा हि दारा: सर्वेषां दारसंग्रहवर्तिनाम्।**'इति वसिष्ठो महामुनिरपि उवाच। कस्याश्चन स्त्रिय: प्रत्येकतया पूजाव्रतादीनि न आवश्यकानीति भर्तृसेवैव तासां सर्वपुण्यदायिनीति च मनुरुपादिशत्।

**नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।**

**पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥**

पतिव्रता मामपि जेष्यतीति स्वयं यमधर्मराजोऽवादीत्।

**एषा माता पिता बन्धुरेष मे दैवतं परम्।**

**एवं शुश्रूषते या तु सा मां विजयते सदा॥**

तथा हि पतिभक्त्या यमविजेत्रीषु अन्यतमाया: सावित्र्या: नाम रामायणेऽपि कदाचित् सीतादेव्या संस्मृता।'

पतिव्रतामाहात्म्यं ब्रह्मवैवर्तपुराणे इत्थम् कीर्तितम्

**पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि।**

**तेजश्च सर्वदेवानां मुनीनां च सतीषु च॥**

**तपस्विनां तप: सर्वं व्रतिनां यत् फलं व्रज।**

**दाने फलं यद्दातॄणां तत्सर्वं तासु सन्ततम्॥**

स्वप्नवासवादत्तेऽपि तदनुगुणमेव प्रवृत्ता। सतीत्वधर्म: पुन: पुन: विविधै: पूजनीयै: प्रशंसित:।चरित्रचित्रणे सिद्धहस्तो भास: स्त्रीपात्रचित्रणे स्वीयनैपुण्यतां कथं प्रदर्शितवान् इति अनुशीलनं क्रियते। तत्र वासवदत्ता नाटकस्य नायिका नायकोदयनस्य प्रथमापत्नी च, पद्मावती मगधराजदर्शकस्य भगिनी तथा उदयनस्य द्वितीया पत्नी, तापसी मगधराजस्य तपोवनस्य तपस्विनी, वासवदत्ताया: माता अङ्गारवती, मधुकरिका, पद्मिनिका, धात्री, वसुन्धरा, विजया इत्यादिनां चरित्राणां वर्णनमत्र प्रस्तूयते।

❖ **वासवदत्ता-** नाट्यशास्त्रदृष्ट्या प्रस्तुतनाटकस्य प्रधाननायिका वासवदत्ता स्वीया मध्या नायिकास्ति। साहित्यदर्पणे स्वीयानायिकाया लक्षणमुक्तम् –**"विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया**[10]। मध्याया: नायिकाया लक्षणं यथा तत्रैव – –

9.अयो.कां.118.21–23

**मध्या विचित्रसुरता प्ररूढस्मरयौवना।**

**ईषत्प्रगल्भवचना मध्यमाव्रीडिता मता।।**[11]

वासवदत्ता उज्जयिन्याः राज्ञः प्रद्योतमहासेनस्य सुतासीत्। वत्सराजेनोदयनेन सह वासवदत्तायाः गान्धर्वविवाहः विहितः। तस्मिन् काले क्षत्रियेष्विदं कार्यमुचितमेवासीत्। वासवदत्तायाः चारित्रिकविश्लेषेणे वैशिष्ट्यानि यानि दृश्यन्ते तानि अधोलिखितानि सन्ति।

- **प्रेमिका-** नाटकस्य अध्ययनेन ज्ञायते यत् वासवदत्तायाः उदयने अतिस्नेहोऽस्ति इति। किन्तु वासवदत्तायाः स्नेहे त्यागस्य भावना वर्तते। वासवदत्ता स्वपत्यूर्दयनस्य प्रतिष्ठासमृद्ध्यर्थमेव पतिवियोगमङ्गीकृत्य कथयति "भवतु अविचार्य क्रमं न करिष्यति" इति वासवदत्तायां स्वोच्चकुलाभिमानम्। प्रथमाङ्के तपोवने राजभटैरूत्सारणं श्रुत्वा खेदमनुभूय कथयति – **"तथा परिश्रमः परिखेदं नोत्पादयति, यथाऽयं परिभवः।**[12]**"**

सा गुणग्राहिणी वर्तते। इतरेषां गुणान् इयं श्लाघयति। यथा प्रथमाङ्के सा पद्मावतीमवलोक्य "अभिजनानुरूपं खल्वस्यरूपम्" इति कथयति। वासवदत्तायाः विश्वासे मूलमस्ति उदयनप्रेम एव। पत्युः उदयनस्य अभ्युदयाय सा अनेकान् क्लेशान् सहते। राजा निजपहृतं राज्यं पुनः प्राप्नुयात् इत्युद्देश्येन सा यौगन्धरायणस्य योजनां सफलयितुं प्रयत्नं करोति। पञ्चमाङ्के समुद्रगृहे च सा भणति – **"किं न खलु दृष्टास्मि? महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारे मम दर्शनेन निष्फलः संवृत्तः**[13]**।** सा स्वभावेन धीरवर्गस्य नायिका यौगन्धरायणवदैव स्वकार्यसाधने धैर्यं वहति। पद्मावती सपत्नी भविष्यतीति ज्ञात्वापि पत्युर्लाभाया उदयनस्य अभ्युदयार्थे च सा सर्वं कष्टं सहते। स्वकीयान् वियोगदिवसान् यापयन्ती सा भणति – **"आर्यपुत्रं पश्यामीत्यनेन मनोरथेन जीवामि मन्दभागा।"**[14]

- **भगिनीधर्मः-** वासवदत्ता स्वभावेन सरला निष्कपटपूर्णा नायिका अस्ति। यद्यपि पद्मावत्या सह उदयनस्य विवाहेन तस्याः स्वभावतः दुःखं भवति। दुःखातिशयेन सा निद्रामपि न लभते। तदानीं तयोक्तं वाक्यमिदं कीदृशं मार्मिकं वर्तते इति पश्यन्तु– **"अहमपि शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे**[15]**"** किन्तु सा सपत्नी पद्मावतीं दृष्ट्वा स्पर्धां न करोति, किन्तु वासवदत्ताया पद्मावतीं प्रति स्नेहः क्रियते। पञ्चमाङ्के पद्मावत्याः शिरोव्यथां श्रुत्वा सा अतीव खिन्ना भवति। सखीजन व्यवहारार्थं क्षमायाचमानायां पद्मावत्यां स्नेहं वितरन्ती सा कथयति "आर्थिस्वं नाम शरीरमपराध्यति।" अस्यां स्वसौन्दर्यानुसारमेव कुलीनताप्यस्ति। प्रथमाङ्के तापसी तां दृष्ट्वा कथयति– "यदीदृशी अस्या आकृतिरियमपि राजदारिकेति तर्कयामि।"

एषा पद्मावतीं भगीनीरूपेण पश्यति। तद्यथा राजदारिकेति श्रुत्वा भगिनीस्नेहोऽपि मेऽत्र सम्पद्यते। अयमपि अस्याः निष्कापट्यस्य परिचयोऽस्ति। समस्तयोजना चक्रसञ्चालकं यौगन्धरायणं प्रति कदापीयं कटुवचनं नाचरति। अतः तस्मिन्

---

[10].सा. द–3/5

[11].सा. द– 3/59।

[12].स्व. वा.द– प्र.अ

[13]. स्व. वा. द– प्र.अ

[14].स्व. वा.द–तृ.अ

[15].स्व.वा.द–तृ.अ.

मृदुता सरलता च वर्तते एव। महाराजदर्शकपत्न्यापि अस्याः विषये चेटीमुखात् कथयति तृतीयाङ्के “महाकुलप्रसुता स्निग्धा निपुणेति इमां तावत् कौतुकमालांगुम्फत्वार्या” इति अयमपि अस्याः कुलीनतायाः परिचयोऽस्ति।

- **पत्नीधर्मः-** एषा एका सतीसाध्वी पतिपरायणा नायिका। सा पतिव्रतस्वधर्मं जानाति। प्रोषितभर्तृकाया आचारमाचरति। यदा प्रथमाङ्के ब्रह्मचारी तपोवनं प्रविशति यदा वासवदत्ता लज्जते तदा पद्मावती कथयति - “अम्मो। पुरुषदर्शनं परिहरत्यार्या।" सुपरिपालनीयः खलु मन्यासः। राजा स्वप्नावस्थायां वासवदत्तां दर्शनान्तरं विदूषकं कथयति-

**“स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।**

**चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम्।। ”**[16]

वासवदत्तायाः मनसि राजानां प्रति महती श्रद्धा वर्तते। यथा प्रथमाङ्के ब्रह्मचारी मुखात् सा शृणोति यद् राजा मोहमुपागतः इति। तदा सा दुःखिता भवति रोदिति च। स्वविरहावस्थायां प्रथमेऽवसरे चतुर्थाङ्के दृष्ट्वा सा कथयति - **“दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः”** यदा चतुर्थाङ्के विदूषकः स्मारितां वासवदत्तां स्मृत्वा राजा साश्रुपातः सन्तिष्ठते तदा सा तु बहिर्गच्छति। किन्तु पद्मावतीं पत्युदयनस्य समीपे प्रेषयति। तृतीयोङ्के कौतुकमालागुम्फनसमयेऽविधकाकरणमौषधं वारम्वारं गुम्फति कथयति चात्मगतम् इदं बहूशो गुम्फितव्यं मया च पद्मावत्यै च इति। तदानीमपि तस्या पतिपरायणतायाः परिचयः मिलति। राज्ञ मुखात् स्वविषयकप्रेमालापं श्रुत्वा सानन्दं वियोगजनितदुःखं सहते। यथा चतुर्थाङ्के - **“पद्मावती बहूमता मम यद्यपि रूपशीलमाधुर्यैः। वासवदत्ताबद्धं न तु तावन्मे मनोहरति।।**

इति श्रुत्वा कथयति। सा भवतु भवन्तु दत्तं वेतनमस्य अहो। अज्ञातवासोऽप्यत्र बहूगुणः सम्पद्यते। स्नेहोऽप्यस्यां प्राचुर्येणावलोक्यते तथा चतुर्थाङ्के पद्मावती स्वयमेव गच्छति। तदा ममार्यपुत्रस्थयै अथवार्याया वासवदत्ताया इति। यद्यपि बहुषु स्थलेषु पतिपक्षपातं कृत्वा प्रोषितभर्तृकायाः धर्ममुल्लङ्घयति, तथापि अतिचातुर्येण कथनेन रहस्योद्भेदनं न करोति। तद्यथा“आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः अस्तु दृष्ट उपायः।”

❖ **उपसंहारः** - अनेन प्रकारेण सा प्रत्युत्पन्नमतिः इति परिचयोऽपि मिलति। इत्थं कविना वासवदत्ताचरित्रं त्यागपूर्णादर्शनारीरूपेण चित्रिता। वासवदत्तायां सच्चरित्रता, सरलता, मृदुता, दयालुता, बुद्धिमत्ता, **“पतिपरायणता, त्यागभावनादयः गुणाश्च वर्तन्ते। अत एव राजा तां प्रति कथयति - “कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वापि।”** [17] इति। इत्ययमुदयनवासवदत्तयोर्विवाहसन्दर्भः। अत्रस्थाः मुग्धत्वं ललितकोमलपदेष्विति निर्मल स्फुटशैल्याभिव्यक्तम्। उदयन वन्धुमत्योर्विवाहपर्यन्तं यौवनमध्यमस्थैषा मध्येति ग्राह्यम्। पुनः पद्मावतीर्विवाहाय प्रौढिमामाप्तैषा स्वसुखमपि परित्यज्य उदयनपद्मावत्योर्विवाहाय कृतपरिकरैषा प्रोढेति वक्तुं समुचितमेव। अत्रेको विषयः व्यज्यते भर्तृसम्भोगेच्छामपि न्यक्कृत्येषा भर्तृहिताय वनागमनं वृणोतीत्यनेनास्याः मानसिकस्थितिः प्रौढजनसामान्य-व्रीशरहितकान्ताभिसरणं हेतुकस्मरविकासमप्यतिरिच्य वर्तते इत्यवगम्यते। एषा प्रौढदशातिरिक्ता धीरेत्यवगन्तुमर्ह- स्वप्नवासवदत्तायापि अनेनैव प्रकारेण धीरेति स्वीकरणीया।

**सन्दर्भग्रन्थसूची**


1. अमरकोशः,रामाश्रमी टीकासहित, चौखम्बासंस्कृतसीरीज आफिस, वाराणसी,1970
2. मनुस्मृतिः, मोतीलाल बनारसीदास-दिल्ली,1983


---

[16].स्व. वा. द-5/10

[17].स्व.वा.द- 4/4।

3. रामायणम्, वाल्मीकिः (अनुवादक - दासमार्कण्ड), भूवनेश्वरम्, 1997
4. श्रीमद्रामायणम्- वाल्मीकिः गीताप्रेस् गोरख्पुर् विक्रम सं. 2010
5. स्वप्नवासवादत्ता, भासः मोतीलाल बनारसीदास-दिल्ली,1983